॥ श्री ॥ ॐ नमः श्री वेंकटेशाय ॥ श्री भर्तृहरिविरचिते शतकत्रिके प्र
थमं नीतिशतकमारभ्यते ॥ ॥ यां चिंतयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ॥ अस्मत्कृते च परितुष्य
ति काचिदन्या धिक्तां च तं च मदनं च इमां च मां च ॥१॥ अज्ञः सुखमा
राध्यः सुखतरमाराध्यते विशेषज्ञः ॥ ज्ञानलवदुर्विदग्धं ब्रह्मापि
नरं न रंजयति ॥२॥ प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रांकुरात्समु
द्रमपि संतरेत्प्रचलदूर्मिमालाकुलं ॥ भुजंगमपि कोपितं शिरसि पु
ष्पवद्धारयेन्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥३॥ लभेत
सिकतासु तैलमपि यत्नतः पीडयन् पिबेच्च मृगतृष्णिकासु सलि
लं पिपासार्दितः ॥ कदाचिदपि पर्यटन् शशविषाणमासादयेन्न तु
प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥४॥ शशी दिवसधूसरो ग
लितयौवना कामिनी सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ॥
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो नृपांगणगतः खलो म

नसिरस्तत्रास्वाद्यानिमे ॥५॥ मणिः शाणोल्लीढः समरविजयी हेतिनि
हितो मदः क्षीणो नागः शरदि सरितः श्यामपुलिनाः कलाशेषश्चंद्रः
सुरतमृदिता बालवनिता तनिम्ना शोभंते गलितविभवाश्चार्थिषु न
राः ॥६॥ परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये स पश्चात्संपूर्णः क
लयति धरित्रीं तृणसमां ॥ अतश्चानेकांत्यगुरुलघुतयार्थेषु धनिनामव
वस्थावस्तूनि प्रथयति संकोचयति च ॥७॥ शास्त्रोपस्कृतशब्दसुंदरगि
रं शिष्यप्रदेयागमा विख्याताः कवयो वसंति विषये यस्य प्रभोर्निर्धनाः ॥
तज्जाड्यं वसुधाधिपस्य सुधियो ह्यर्थं विनापीश्वराः कुत्स्याः स्युः कुपरीक्ष
कान मणयो यैरर्घतः पातिताः ॥८॥ विपदि धैर्यमथाभ्युदये क्षमा सदसि वा
क्पटुता युधि विक्रमः ॥ यशसि चाभिरतिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि
महात्मनां ॥९॥ निंदंतु नीतिनिपुणा यदि वास्तुवंतु लक्ष्मीः समाविशतु गच्छ
तु वा यथेष्टं ॥ अद्यैव वा मरणमस्तु युगांतरे वा न्याय्यात्पथः प्रविचलंति प
दं न धीराः ॥१०॥ हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदाप्यर्थिभ्यः

॥श्रीरामनारायण॥

[illegible]लिपा [illegible] मानमुन्नितं [illegible] निवड्डिं परं॥ कल्पांतेष्वपि नप्रयाति निध
नं विद्याख्यमंतर्द्धनं येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्द्धते॥११॥
[illegible] परमार्थान्नृप डेतान्मावमंस्था स्तृणमिव लघु लक्ष्मी नैवतान्
संरुणद्धि॥ अभिनवमदलेखा श्यामगंडस्थलीनां न भवति विसतंतुर्वा
रणं वारणानां॥१२॥ क्षुत्क्षामो पि जराकृशो पि शिथिलप्राणो पि कष्टांद
शामापन्नो पि विपन्नदीधितिरपि प्राणेषु गच्छत्स्वपि॥ मत्तेभेंद्रविभिन्न
कुंभकवलग्रासैकबद्धस्पृहः किं जीर्णं तृणमत्ति मानमहतामग्रे
सरः केसरी॥१३॥ [illegible]

॥सं१७०२ समये कार्त्तिक शुक्ल १० सूर्ये पूर्वाह्णे समाप्त॥ शुं॥ श्रीजयमल्ल
जीतनय शुं। श्री नरसिंहदासजी पठनार्थं॥ ॥लि॥ ब्रा॥ भैरवः॥
यादृशी पुस्तके दृष्टं तादृशी लिखितं मया। यदि शुद्धमशुद्धं वा मम दोषो न दीय
ते।

॥६०॥ अथ श्री भर्तृहर विरचिते शतत्रिके प्रथमं नीतिशतमारभ्यते ॥
॥ यांचिंतयामि सततं मयि सा विरक्ता साप्यन्यमिच्छति जनं स जनोऽ
न्यसक्तः । अस्मत्कृते च परितुष्यति काचिदन्या धिक्तां च तं च मदनं
च इमां च मां च ॥१॥ अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ॥
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रंजयति ॥२॥ प्रसह्य मणिमुद्धरेन्म
करवक्त्रदंष्ट्रांकुरात्समुद्रमपि संतरेत्प्रचलदूर्मिमालाकुलं ॥
भुजंगमपि कोपितं शिरसि पुष्पवद्धारयेन्न तु प्रतिनिविष्टमूर्ख
जनचित्तमाराधयेत् ॥३॥ लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ॥ कदाचिदपि पर्यटन्
शशविषाणमासादयेन्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥४॥
शशी दिवसधूसरो गलितयौवना कामिनी सरो विगतवारिजं मुख
मनक्षरं स्वाकृतेः ॥ प्रभुर्धनपरायणः सततदुर्गतः सज्जनो नृपांग
णगतः खलो मनसि सप्त शल्यानि मे ॥५॥ मणिः शाणोल्लीढः समरवि

जयीहेतिनिहितोमदः क्षीणोनागः शरदिसरितः श्यामपुलिनाः॥क
लाशेषश्चंद्रः सुरतमृदिताबालवनितातनिम्ना शोभंतेगलितविभवा
श्चार्थिषुनराः॥६॥परिक्षीणः कश्चित्स्पृहयतियवानांप्रसृतयेसपश्चा
त्संपूर्णोगणयतिधरित्रींतृणसमां॥अतश्चानैकांत्यंगुरुलघुतयार्थेषु
धनिनामवस्थावस्तूनिप्रथयतिसंकोचयतिच॥७॥शास्त्रोपस्कृतश
ब्दसुंदरगिरःशिष्यप्रदेयागमाविख्याताः कवयोवसंतिविषयेयस्यप्र
भोर्निर्धनाः॥तज्जाड्यंवसुधाधिपस्यसुधियोह्यर्थंविनापीश्वराःकु
त्स्याःस्युःकुपरीक्षकानमणयोयैरर्घतःपातिताः॥८॥विपदिधैर्यमथा
भ्युदयेक्षमासदसिवाक्पटुतायुधिविक्रमः॥यशसिचाभिरतिर्व्य
सनंश्रुतौप्रकृतिसिद्धमिदंहिमहात्मनां॥९॥निंदंतुनीतिनिपुणाय
दिवास्तुवंतुलक्ष्मीःसमाविशतुगच्छतुवायथेष्टं॥अद्यैववामरणमस्तु
युगांतरेवान्याय्यात्पथःप्रविचलंतिपदंनधीराः॥१०॥हर्तुर्यातिनगो
चरंकिमपिशंपुष्णातियत्सर्वदाप्यर्थिभ्यःप्रतिपाद्यमानमनिशंप्राप्नो
तिवृद्धिंपरां॥कल्पांतेष्वपिनप्रयातिनिधनंविद्याख्यमंतर्धनंयेषांतां

न्नत्रतिमानमुन्नतनृपाः कस्तैः सहस्पर्द्धते ॥११॥ अधिगतपरमार्थान्
पंडितान्मावमंस्थास्तृणमिवलघुलक्ष्मीर्नैवतान्संरुणद्धि ॥ अभि
नवमदलेखाश्यामगंडस्थलीनां न भवति बिसतंतुर्वारणंवार
णानां ॥१२॥ क्षुत्क्षामोपिजराकृशोपि शिथिलप्राणोपिकष्टांदशा
मापन्नोपिविपन्नदीधितिरपिप्राणेषुनश्यत्स्वपि ॥ मत्तेभेंद्रविभि
न्नकुंभकवलग्रासैकबद्धस्पृहः किंजीर्णंतृणमत्तिमानमहताम
ग्रेसरः केसरी ॥१३॥ असंतोनाभ्यर्थ्याः सुहृदपिनयाच्यः कृशध
नः प्रियान्याय्यावृत्तिर्मलिनमसुभंगेप्यसुकरं ॥ विपद्युच्चैः स्थेयं
पदमनुविधेयंचमहतां सतांकेनोद्दिष्टं विषममसिधाराव्रतमि
दं ॥१४॥ मनसिवचसिकायेपुण्यपीयूषपूर्णास्त्रिभुवनमुपकार
श्रेणिभिः प्रीणयंतः ॥ परगुणपरमाणून्पर्वतीकृत्यनित्यंनिजहृ
दिविकसंतः संतिसंतः कियंतः ॥१५॥ इतः स्वपितिकेशवः कुल
मितस्तदीयद्विषामितश्चशरणार्थिनः शिखरिपत्रिणः शेरते ॥ २
इतश्चवडवानलः सहसमस्तसंवर्त्तकैरहोविततमूर्जितंभरस

हंसं च सिंधोर्विपुः ॥१६॥ उदन्वछन्नानूः स च [illegible]निधिरपांयोजन
शतंसदापांथः श्वागगनपरिमाणंकलयति ॥इतिप्रायोभावाः
स्फुरदवधिमुद्रामुकुलिताःसतांप्रज्ञोन्मेषः पुनरयमसीमाविज
यते ॥१७॥ क्वचिद्भूमौशय्या क्वचिदपिचपर्य्यंकशयनं क्वचिच्छाकाहा
राः क्वचिदपिचशाल्योदनरुचिः ॥ क्वचित्कंथाधारी क्वचिदपिचदि
व्यांबरधरो मनस्वीकार्यार्थी नगणयतिदुःखंनचसुखं ॥१८॥ येसंतो
षसुखप्रमोदमुदितास्तेषांनभिन्नामुदो येत्वन्येधनलुब्धसंकुलधि
यस्तेषांनतृष्णाहता ॥ इत्थंकस्यकृते कृतः सविधिना तादृक्पदं
संपदां स्वात्मन्येवसमाप्तहेममहिमा मेरुर्नमेरोचते ॥१९॥ नमस्या
मोदेवान्ननुहतविधेस्तेपिवशगा विधिर्वंद्यःसोपिप्रतिनियतक
र्मैकफलदः ॥ फलंकर्मायत्तंयदिकिममरैः किंचविधिना नमस्त
त्कर्मभ्यो विधिरपिनयेभ्यः प्रभवति ॥२०॥ दौर्मंत्र्यान्नृपतिर्विन
श्यतियतिः संगात्सुतोलालनाद्विप्रोनध्ययनात्कुलंकुतनयाच्छी

लंखलोपासनात्॥ मैत्री चाप्रणयात्समृद्धिरनयात्स्नेहः प्रवासाश्रया
स्त्रीमद्यादनवेक्षणादपि कृषिस्त्यागात्प्रमादाद्धनं॥२१॥ जाड्यं ह्री
मति गण्यते व्रतरुचौ दंभः शुचौ कैतवं शूरे निर्घृणता ऋजौ विमतिता
दैन्यं प्रियालापिनि॥ तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः
स्थिरे तत्को नाम गुणो भवेत्सुगुणिनां यो दुर्जनैर्नांकितः॥२२॥ जाति
र्यातु रसातलं गुणगणस्तत्राप्यधो गच्छतां शीलं शैलतटात्पत
त्वभिजनः संदह्यतां वह्निना॥ शौर्ये वैरिणि वज्रमाशु निपतत्वर्थो
स्तु नः केवलं येनैकेन विना गुणास्तृणलवः प्रायाः समस्ता इमे॥२३॥
भग्नाशस्य करंडपीडिततनोर्म्लानेंद्रियस्य क्षुधा कृत्वाखुर्विवरं स्व
यं निपतितो नक्तं मुखे भोगिनः॥ तृप्तस्तत्पिशितेन सत्वरमसौ तेनै
व यातः पथा स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये वाकुलं॥२४॥
पातितोपि कराघातैरुत्पतत्येव कंडुकः॥ प्रायेण साधुवृत्तानामस्था
यिन्यो विपत्तयः॥२५॥ प्रायः कंडुकपातेनोत्पतत्यार्यः पतन्नपि॥ त

२

दात्वनार्यः पतति स्मृतिपिंडगुटिका यथा ॥२६॥ प्रीणाति यः सुचरितैः
पितरं स पुत्रो यद्भर्तुरेव हितमिछति तत्कलत्रं ॥ तन्मित्रमापदि
सुखे च समक्रियं यदेतत्त्रयं जगति पुण्यकृतो लभंते ॥२७॥ संप
सु महतां चित्तं भवत्युत्पलकोमलं ॥ आपत्सु च महाशैलशिलासं
घातकर्कशं ॥२८॥ दुर्जनः परिहर्त्तव्यो विद्ययालंकृतोपि सन् ॥ म
णिना भूषितः सर्पः किमसौ न भयंकरः ॥२९॥ क्षीरेणात्मगतोदकाय
हि गुणा दत्ताः पुरा तेऽखिलाः क्षीरे तापमवेक्ष्य तेन पयसा स्वात्मा
कृशानौ हुतः ॥ गंतुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदं यु
क्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥३०॥ या साधूंश्च ख
लान्करोति विदुषो मूर्खान्हितान्द्वेषिणः प्रत्यक्षं कुरुते परोक्षम
मृतं हालाहलं तत्क्षणात् ॥ तामाराधय सत्क्रियां भगवतीं भोक्तुं फ
लं वांछितं हे साधो व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ॥३१॥
कृमिकुलचितं लालाक्लिन्नं विगंधि जुगुप्सितं निरुपमरसप्रीत्या
खादन्नरास्थि निरामिषं ॥ सुरपतिमपि श्वा पार्श्वस्थं विलोक्य

शांकतेन द्विगणयति क्षुद्रोजंतुः परिग्रहफल्गुतां॥ ३२॥ स्वल्पस्ना
युवशेषमलिनं निर्म्मांसमप्यस्थिकं श्वालब्ध्वा परितोषमेति न च
तत्तस्य क्षुधाशांतये॥ सिंहोजंबुकमंकमागतमपि त्यक्त्वा निहंति।
द्विपंसर्वः कृच्छ्रगतोपि वांछति जनः सत्वानुरूपंफलं॥ ३३॥ पापान्निवार
यति योजयते हिताय गुह्यं निगूहति गुणान्प्रकटीकरोति॥ आपद्गतं
चन जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदंति संतः॥ ३४॥ मृ
गमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनां॥ लुब्धकधीवरपि
शुनानिःकारणवैरिणो जगति॥ ३५॥ संतप्तायसि संस्थितस्य पयसो ना
मापि न ज्ञायते मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते॥ स्वात्यां
सा ॰ गरशुक्तिसंपुटगतं तज्जायते मौक्तिकं प्रायेणाधममध्यमोत्तम
गुणः संवासतो जायते॥ ३६॥ ब्रह्मायेन कुलालवन्नियमितो ब्रह्मांड
भांडोदरे विष्णुर्येन दशावतारगहने क्षिप्तः सदा संकटे॥ रुद्रो येन क
पालपाणिपुटके भिक्षाटनं कारितः सूर्यो भ्राम्यति नित्यमेव गगने तस्मै
नमः कर्म्मणे॥ ३७॥ कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः। मूर्ध्नि वा स

र्वल्लोकस्य श्रीर्यतेवनएव ॥३७॥ मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको
वा धृष्टः पार्श्वे भवति च तथा दूरतश्चाप्रगल्भः ॥ क्षांत्या भीरुर्यदि न सहते प्रा
यशो नाभिजातः सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥३८॥ नम्रत्वेनोन्न
मंतः परगुणकथनैः स्वान्गुणान्ख्यापयंतः स्वार्थान्संपादयंतो विततपृथु
फलारंभयत्नाः परार्थे ॥ क्षांत्यैवाक्षेपरूक्षाक्षरमुखरमुखान् दुर्मुखान्
दूषयंतः संतः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः ॥४०॥ लो
भश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः सत्यं चेत्तपसा च किं शुचि मनो
यद्यस्ति तीर्थेन किं ॥ सौजन्यं यदि किं निजैः स्वमहिमा यद्यस्ति किं मंडनैः ॥
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥४१॥ खल्वाटो दिवसेश्व
रस्य किरणैः संतापितो मस्तके वांछन्देशमनातपं विधिवशात्तालस्य मू
लं गतः ॥ तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः प्रायो गच्छति यत्र दै
वहतकस्तत्रैव यांत्यापदः ॥४२॥ नैवाकृतिः फलति नैव कुलं न शीलं वि
द्यापि नैव न च यत्नकृतापि सेवा ॥ भाग्यानि पूर्वतपसा परिसंचितानि का

लेफलंतिपुरुषस्यययेह वृक्षाः॥४३॥ऐश्वर्यस्यविभूषणं सुजनताशौ
र्यस्यवाक्संयमोज्ञानस्योपशमः शमस्यविनयोवित्तस्यपात्रेव्ययः॥
6 अक्रोधस्तपसःक्षमाप्रभवितुर्धर्मस्यनिर्व्याजतासर्वेषामपिसर्वकारण
मिदंशीलंपरंभूषणं॥४४॥एतेसत्पुरुषाःपरार्थघटकाःस्वार्थंपरित्यज्य
येसामान्यास्तुपरार्थमुद्यमभृतःस्वार्थाविरोधेनये॥तेमीमानुषराक्ष
साःपरिहितंस्वार्थायनिघ्नंतियेयेतुघ्नंतिनिरर्थकंपरिहितंतेकेनजा
नीमहे॥४५॥जाड्यंधियोहरतिसिंचतिवाचिसत्यंमानोन्नतिंदिशति
दिक्षुतनोतिकीर्तिं॥चेतःप्रसादयतिपापमपाकरोतिसत्संगतिःकथ
यकिंनकरोतिपुंसां॥४६॥वांछासज्जनसंगमेपरगुणेप्रीतिर्गुरौनम्र
ताविद्यायांव्यसनंस्वयोषितिरतिर्लोकापवादाद्भयं॥भक्तिःशूलिनि
शक्तिरात्मदमनेसंसर्गमुक्तिःखलेएतेयत्रवसंतिनिर्मलगुणास्तेभ्यो
नरेभ्योनमः॥४७॥अयाहृदयंतथैववदनंयद्दर्पणांतःस्थितंज्ञावाः
पर्वतसूक्ष्ममार्गविषमःस्त्रीणांनविज्ञायते॥चित्तंपुष्करपत्रतोयतरलं

विद्भिरिरार्शांकितंनारीनाम विषांकुरैरिवलतादोषैः समंवर्द्धिता॥४८॥
तृष्णांछिंधि भजक्षमां जहिमदंपापेरतिंमाकृथाः सत्यंब्रूह्यनुया
हिसाधुपदवींसेवस्व विद्वज्जनान्॥ मान्यान्मानय विद्विषोप्यनुन
यप्रच्छादयस्वान्गुणान्कीर्तिंपालयदुःखितेकुरुदयामेतत्सतां
चेष्टितं॥४९॥ गुणवदगुणवद्वा कुर्वताकार्यजातंपरिणतिरवधा
र्यायत्नतःपंडितेन॥ अतिरभसकृतानांकर्मणामाविपत्तेर्भवति
हृदयदाही शल्यतुल्यो विपाकः॥५०॥ एकोदेवो भुक्तिदोमुक्तिदोवा
एकंमित्रंभूपतिर्वायतिर्वा॥ एकोवासः पत्तनेवावनेवा एकाभार्या
सुंदरीवादरीवा॥५१॥ भीमंवनंभवतितस्यपुरंप्रधानंसर्वोजनः
सुजनतामुपयातितस्य॥ कृत्स्नाचभूर्भवतिसंनिधिरत्नपूर्णायस्य
स्यास्तिपूर्वसुकृतंविपुलंनरस्य॥५२॥ यन्नागामदभिन्नगंडकरय
तिष्ठंतिनिद्रालसाद्वारेहेमविभूषिताश्चतुरगावल्गीतियद्दर्पिताः॥
वीणावेणुमृदंगशंखपणवैः सुप्तस्तुयद्बोध्यतेतत्सर्वंसुरलोकभूद्वि

सद्वृत्तौ धर्मस्य विस्फूर्जिते ॥५३॥ मज्जत्वंभसि यातु मेरुशिखरं शत्रुं जि
यत्वाहवे वाणिज्यं कृषिसेवनादि सकला विद्याः कलाः शिक्षतु । आ
काशं खगवत्प्रयातु विपुलं कृत्वा प्रयत्नं परं नाभाव्यं भवतीह कर्म
वशतो भाव्यस्य नाशो न तु ॥५४॥ वरं प्राणच्छेदः समदमघवन्मुक्तकुलिश
प्रहारैरुज्जछद्बहलदहनोद्गारगुरुभिः ॥ तुषाराद्रेः सूनोरहह पितरि
क्लेशविवशे न चासौ संपातः पयसि पयसां पत्युरुचितः ॥५५॥ नेता यत्र
बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः स्वर्गो दुर्गमनुग्रहः खलु हरेरै
रावणो वाहनं ॥ इत्यैश्वर्यपरंपराभिमघवान्नन्न भग्नः परैः संगरे तद्यु
क्तं ननु दैवमेव शरणं धिक् धिक् वृथा पौरुषं ॥५६॥ कर्मायत्तं फलं पुंसां
बुद्धिः कर्मानुसारिणी ॥ तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥५७॥
आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ॥ नास्त्युद्यमसमो ब
न्धुः कृत्वा यं नावसीदति ॥५८॥ वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ॥ ६
न मूर्खजनसंसर्गः सुरेन्द्रभुवनेष्वपि ॥५९॥ धातस्तात विरुद्धोऽपि द्वितयी

मा कथा नृणां ॥ भृत्यत्वमविवेकज्ञे स्नेहमन्यरते जने ॥ ६०॥ दानं भोग
नाशास्तिस्रो गतयो भवंति वित्तस्य ॥ यो न ददाति न भुंक्ते तस्य तृतीया
गतिर्भवति ॥ ६१॥ यस्यास्ति वित्तं स नरः कुलीनः स पंडितः स श्रुति
मान्विनीतः ॥ स एव वक्ता स च दर्शनीयः सर्वे गुणाः कांचनमाश्रयंति ॥ ६२॥
रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिं ॥ सुधां विना
न प्रययुर्विरामं न निश्चितार्थाद्विरमंति धीराः ॥ ६३॥ संत्यन्येपि बृह
स्पतिप्रभृतयः संभाविताः पंच षास्तान्प्रत्येष विशेषविक्रमरुची रा
हुर्न वैरायते ॥ द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भास्करौ भ्रातः
पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः ॥ ६४॥ इत्थं य त्वत तस्मि
न्वा निरवधि चमत्कृत्य तिरायेवराहो राकुर्वा प्रभवति चमत्कारवि
षयः ॥ महीमेकोमग्नां यदयमवहद्दंतसलिलैः शिरः शेषं शत्रून्निग
लितिपरः संत्यजतिच ॥ ६५॥ श्रोत्रं श्रुतेनैव न कुंडलेन दानेन पात्रा पाणि र्न उ
णि न कंकणेन ॥ विभाति कायः करुणाकराणां परोपकारेण न चं
दनेन ॥ ६६॥ जयंति ते सुकृतिनो रस सिद्धाः कवीश्वराः ॥ नास्ति

येषांयशःकाये जरामरणजंभयं॥६७॥यद्धात्रा निजभालदेश्रा
लिखितंस्तोकंमहद्वाधनंतत्प्राप्नोतिमरुस्थलेपि नितरांमेरोचना
तोधिकं॥तद्धीरोभववित्तवसुकृपणांवृत्तिंवृथामाकृथाःकूपेपश्य
8 पयोनिधावपिघटोगृह्णातितुल्यंजलं॥६८॥लांगूलचालनमधश्चर
णावपातंभूमौनिपत्यवदनोदरदर्शनंच॥श्वापिंडदस्यकुरुतेगज
पुंगवस्तुधीरंविलोकयतिचाटुशतैश्चभुंक्ते॥६९॥राजन्दुधुक्षसि
यदिक्षितिधेनुमेनांतेनाद्यवत्समिवलोकममुंपुषाण॥तस्मिंस्तुसम्य
११ गनिशंपरिपोष्यमाणेनानाःफलैःफलतिकल्पलतेवभूमिः॥७०॥
सत्यानृताचपरुषाप्रियवादिनीचहिंस्रादयालुरपिचार्थपरावदा
न्या॥नित्यव्ययाप्रचुरनित्यधनागमाचवारांगनेवनृपनीतिरनेक
रूपा॥७१॥नकश्चिच्चंडकोपानामात्मीयोनामभूभुजां॥होतारमपि
जुह्वंतंस्पृष्टोदहतिपावकः॥७२॥विरमविरसायासादस्माद्दुरध्यव
सायतोविपदिमहतांधैर्यध्वंसंयदीक्षितुमीहसे॥अपिजडविधेकल्पा
पायेव्यपेतपराक्रमाःकुलशिखरिणःक्षुद्रानैतेनवाजलराशय॥७३॥

अकरुणत्वमकारणविग्रहः परधनायरतिः परयोषिति ॥ स्वजनबंधुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनां ॥७४॥ कांताकटाक्षविशिखा न खनंति यस्य चित्तं न निर्दहति कोपकृशानुतापः ॥ कर्षंति भूरि विषयाश्च न लोभपाशा लोकत्रयं जयति कृत्स्नमिदं स वीरः ॥७५॥ आरंभगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ॥ दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानां ॥७६॥ प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृते ॥ अनुत्सेको लक्ष्म्यां चिरविनवसाराः परकथाः सतां केनोद्दिष्टं विषममसिधाराव्रतमिदं ॥७७॥ छिन्नोपि रोहति तरुः क्षीणोप्युपचीयते पुनश्चंद्रः ॥ इति विमृशंतः संतः संतप्यंते न विपदा ॥७८॥ नवंति निम्नास्तरवः फलोद्गमैर्नवांबुभिर्भूमिविलंबिनो घनाः ॥ अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणां ॥७९॥ कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणं प्रमार्ष्टुं ॥ अधोमुखस्यापि कृतस्य वह्नेर्नाधः शिखा याति कदाचिदेव ॥८०॥ अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः

स्वदारसंतुष्टैः। परापवादनिवृत्तैः क्वचित्क्वचिन्मंडितावसुधा॥८१॥पद्मा
करं दिनकरो विकचं करोति चंद्रो विकाशयति कैरव चक्रवालं॥नाभ्य
र्थितो जलधरः सलिलं ददाति संतः स्वयं परहितेषु कृताभियोगाः॥८२॥
9 एकेनापि हि शूरेण पादाक्रांतं महीतलं। क्रियते भास्करेणैव स्फार स्फा
रिततेजसा॥८३॥वरं शृंगोत्तुंगाद्गुरुशिखरिणः क्वापि विषमे पतित्वायं
कायः कठिनदृषदंतर्विगलितः॥ वरं न्यस्तो हस्तः फणपतिमुखे तीक्ष्ण
दशने वरं वह्नौ पातस्तदपि न कृतः शीलविलयः॥८४॥वह्निस्तस्य जला
१२ यते जलनिधिः कुल्यायते तत्क्षणान्मेरुः स्वल्पशिलायते मृगपतिः सद्यः
कुरंगायते॥ व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते यस्यांगे
खिललोकवल्लभतमं शीलं समुन्मीलति॥८५॥यदचेतनोपि पादैः स्पृष्टः
प्रज्वलति सवितुरिनकांतः॥ तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते॥८६॥
आज्ञाकीर्त्तिः पालनं ब्राह्मणानां दानं भोगो मित्रसंरक्षणं च॥ येषामेते षड्गु
णा न प्रवृत्ताः कोर्थस्तेषां पार्थिवोपाश्रयेण॥८७॥व्यालं बालमृणालतं
तुभिरसौ रोद्धुं समुज्जृंभते छेत्तुं वज्रमणीन् शिरीषकुसुमप्रांतेन संनह्यति॥ ८

माधुर्यमधुबिंदुनारचयितुं क्षारांबुधेरीहते नेतुंवांछतियःसतांपथिख
लान्सूक्तैःसुधास्पंदिभिः॥८८॥ स्वायत्तमेकांतहितं विधात्रा विनिर्मितंछा
दनमज्ञतायाः। विशेषतः सर्वविदांसमाजे विभूषणंमौनमपंडितानां॥८९॥
उद्भासिताखिलखलस्य विशृंखलस्यप्राग्जातविस्मृतनिजाधमकर्मवृत्तेः॥
दैवादवाप्तविभवस्यगुणद्विषोस्यनीचस्यगोचरगतैःसुखमाप्यतेकैः॥९०॥ वि
द्यानामनरस्यरूपमधिकंप्रच्छन्नगुप्तंधनं विद्याभोगकरीयशःसुखकरी
विद्यागुरूणांगुरुः। विद्याबंधुजनो विदेशगमने विद्यापरंदैवतं विद्याराज
सुपूज्यतेन हिधनं विद्याविहीनःपशुः॥९१॥ दाक्षिण्यंस्वजनेदयापरिजनेशा
ठ्यंजनेदुर्जनेप्रीतिःसाधुजनेस्मयःखलजने विद्वज्जनेचार्जवं॥शौर्यंशत्रु
जनेक्षमागुरुजनेनारीजनेधूर्तताये चैवंपुरुषाःकलासुकुशलास्तेष्वेव
लोकस्थितिः॥९२॥ करेश्लाघ्यस्त्यागःशिरसिगुरुपादप्रणयितासुखेसत्यावाणी
विजयिभुजयोवीर्यमतुलं॥हृदिस्वच्छावृत्तिःश्रुतमधिगतंचश्रवणयोर्विनाप्यै
श्वर्येणप्रकृतिमहतांमंडनमिदं॥९३॥ वहतिभुवनश्रेणींशेषःफणाफल
कस्थितांकमठपतिनामध्येपृष्ठंतदेवचधार्यते। तमपिकुरुतेक्रोडाधीनं

पयोधिरनादरादहहमहतां निःसीमानश्चरित्रविभूतयः॥९४॥ स्पृहयति
भुजगोरंतरमायतकरवालकररुह विकीर्णा॥ विजयश्रीर्वीराणां व्युत्पन्नप्रौ
16 ढवनितेव॥९५॥ परिवर्त्तिनि संसारे मृतः को वा न जायते। स जातो येन जातेन
याति वंशः समुन्नतिं॥९६॥ लज्जां गुणौघजननीं जननीमिव स्वामत्यंतशुद्धहृ
दयामनुवर्त्तमानाः। तेजस्विनः सुखमसूनपि संत्यजंति सत्यव्रतव्यसनिनो
न पुनः प्रतिज्ञां॥९७॥ सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु ग
जेषु॥ प्रकृतिरियं सत्ववतां न खलु वयस्तेजसो हेतुः॥९८॥ किं कूर्मस्य भर
व्यथा न वपुषि क्ष्मां न क्षिपत्येष यत् किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्नि
श्चलः। किं चांगीकृतमुत्सृजन्मनसा श्लाघ्यो जनो लज्जते निर्वाहः प्रतिपन्न
वस्तुनि सतामेतद्धि गोत्रव्रतं॥९९॥ दूरादर्थं घटयति नवं दूरतश्चापशब्दं
त्यक्त्वा भूयो भवति निरतः सत्सभाराधनेषु॥ मंदं मंदं रचयति पदं लोकचित्ता
नुवृत्त्या कामं मंत्री कविरिव सदा खेदभारैरमुक्तः॥१००॥ दैवेन प्रभुणा स्वयं
जगति यद्यस्य प्रमाणीकृतं तत्तस्योपनयेन्मनागपि महान्नैवाश्रयः कारणं॥
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं सूक्ष्मा एव पतंति चातकमुखे द्वित्राः

पयोबिंदवः॥१०१॥ अन्निसुखनिहितस्यसतस्तिष्ठतुतावज्जयोथवास्वर्गः। उत्त
यबलसाधुवादःश्रवणसुखस्यैवतात्पर्यं॥२॥ केयूरानविभूषयंतिपुरुषंहारा
नचंद्रोज्ज्वलानस्नानंनविलेपनंनकुसुमंनालंकृतामूर्द्धजाः॥ वाण्येकासमलंक
रोतिपुरुषंयासंस्कृताधार्यते क्षीयंतेखलुभूषणानिसततंवाग्भूषणंभूषणं॥३॥
परिचयितव्याःसंतोयद्यपिकथयंतिनैकमुपदेशं॥ यास्तेषांस्वैरकथास्ताएवभवं
तिशास्त्राणि॥४॥ दिग्गजकूर्मकुलाचलफणपतिविधृतापिचलतिवसुधेयं॥ प्र
तिपन्नममलमनसांनचलतिपुंसांयुगांतेपि॥५॥ अद्यापिनोज्झतिहरःकिलकाल
कूटंकूर्मोबिभर्त्तिधरणींखलुपृष्ठकेन॥ अंभोनिधिर्वहतिदुस्सहवाडवाग्निमंगी
कृतंसुकृतिनःपरिपालयंति॥६॥ यद्यपिचंदनविटपीविधिनाफलकुसुमवर्जि
तोविहितः। निजवपुषैवपरेषांतथापिसंतापमपनयति॥७॥ यदिनिर्धनःसत्पु
रुषायदिचसुरूपाणिपरकलत्राणि॥ अनुपचितसुकृतसंचयतवहृदयकिमा
कुलीभाव॥७॥ यदिनामदैवजगत्याजगदसरोजंकदाचिदपिजातं॥ अवक
रनिकरंविकरतितत्किंकृकवाकुरिवहंसः॥८॥ मर्कटस्यगलेबद्धापुष्पाणामि
वमालिका॥ अविनीतस्ययालक्ष्मीःसाचिरंनैवतिष्ठति॥९॥ अरक्षितंतिष्ठति

दैवरक्षितंसुरक्षितंदैवहतंविनश्यति॥जीवत्यनाथोपिवनेविसर्जितःकृतःप्रय
त्नोपिगृहेनजीवति॥१०॥अयमुच्चधियामलौकिकीमहत्ताकापिकठोरचित्र
ता॥उपकृत्यभवंतिनिस्पृहाःपरतःप्रत्युपकारभीरवः॥ ॥११॥ ॥इतिश्रीभर्तृ
हरिरचितेशतत्रिकप्रबंधेप्रथमंश्रीनीतिशतंसंपूर्णं॥ १ ॥अथशृंगारशतंद्वितीय
मारभ्यते॥ ॥चूडोत्तंसितचारुचंद्रकलिकाचंचच्छिखाभास्वरोलीलादग्ध
विलोलकामशलभःश्रेयोदशाग्रेस्फुरन्॥अंतःस्फूर्जदपारमोहतिमिरप्राग्भार
मुच्छेदयन्चेतःसद्मनियोगिनांविजयतेज्ञानप्रदीपोहरः॥१॥शुभ्रंसद्मसवि
भ्रमायुवतयःश्वेतातपत्रोज्ज्वलालक्ष्मीरित्यनुभूयतेस्थिरमिवस्फीतेशुभेकर्मणि॥
विच्छिन्नेनितरामनंगकलहक्रीडात्रुटत्तंतुकंमुक्ताजालमिवप्रयातिझटि
तिभ्रश्यद्दिशोदृश्यतां॥२॥तावदेवकृतिनामपिस्फुरत्येषनिर्मलविवेकदीप
कः।यावदेवनकुरंगचक्षुषांताड्यतेचटुललोचनांचलैः॥३॥धन्यःसएवच
पलायतलोचनानांतारुण्यदर्पघनपीनपयोधराणां॥क्षामोदरोपरिलसत्त्रि
वलीलतानांदृष्ट्वाकृतिंविकृतिमेतिमनोनयस्य॥४॥सदायोगाभ्यासव्यसन १०
रतयोरात्ममनसोरविच्छिन्नामैत्रीस्फुरतिकृतिनस्तस्यकिमुतैः।प्रियाणामा

लापैरधरमधुरैर्वक्रमधुलिः सुनिः श्वासामोदैः सकुचकलशाश्लेषसुरतैः॥५॥
वचसि भवतिसंगत्यागमुद्दिश्यवार्ता श्रुतमुखरमुखानां केवलं पंडितानां॥
जघनमरुणरत्नग्रंथिकांचीकलापं कुवलयनयनानां को विहातुं समर्थः॥६॥
मत्तेभकुंभदलने भुवि संतिशूराः केचित्प्रचंडमृगराजवधेपिदक्षाः॥ किंतुब्रवी
मिबलिनां पुरतः प्रसह्य कंदर्पदर्पदलने विरला मनुष्याः॥७॥ स्मितेन भावेन
चलज्जया धिया पराङ्मुखैरर्द्धकटाक्षवीक्षितैः॥ वचोभिरीर्ष्याकलहेन लील
यासमस्तभावैः खलु बंधनं स्त्रियः॥८॥ एताश्चलद्वलयसंहतिमेखलोत्थ
झंकारनूपुररवाहृतराजहंसः॥ कुर्वंति कस्य न मनो विवशं तरुण्या वित्रस्त
मुग्धहरिणीसदृशा क्षिपातैः॥९॥ सत्यंवच्मि न पक्षपाताल्लोकेषुस
प्तस्वपि तथ्यमेतत॥ नान्यन्मनोहारि नितंबिनीभ्यो दुःखैकहेतुर्न च किंचिदन्य
त्॥१०॥ लीलावतीनां सहजा विलासास्तएव मूढस्यहृदि स्फुरंति॥ रागोनलि
न्याहि निसर्गसिद्धिस्तत्र भ्रमत्येव मुधाषडंघ्रिः॥११॥ सिद्धाध्यासितकंदरह
रवृषस्कंधावगाढद्रुमे गंगाधौतशिलातले हिमवतः स्थाने स्थिते श्रेयसि॥
कः कुर्वीत शिरः प्रणाममलिनं मानं मनस्वी जने॥ यद्युत्रस्तकुरंगशावनयना

नस्पुःस्मरास्त्रंस्त्रियः॥१२॥असाराःसंत्वेतेविरतिविरसान्वापिविषयाजु
गुप्संतांयद्वानतुसकलदोषास्पदमपि॥तथाप्यंतस्तत्वप्रणिहितधियाम
प्यतिबलस्तदीयोनाख्येयःस्फुरतिहृदयेकोपिमहिमा॥१३॥नवंतावेदां
12 तप्रणिहितधियामत्रगुरवोविदग्धालापानांवयमपिकवीनामनुचराः॥
तथाप्येतद्भूमोनहिपरहितात्पुण्यमधिकंनचास्मिन्संसारेकुवलयदृशो
रम्यमपरं॥१४॥मात्सर्यमुत्सार्यविचार्यकार्यमार्याःसमर्यादमिदंवदंतु॥
सेव्यानितंबाःकिमुभूधराणामुतस्मरस्मेरविलासिनीनां॥१५॥किमिहब
हुभिरुक्तैर्युक्तिशून्यैःप्रलापैर्द्वयमपिपुरुषाणांसर्वदासेवनीयं॥अभि
नवमदलीलालालसंसुंदरीणांस्तनभरपरिखिन्नंयौवनंवावनंवा॥१६॥
राजन्तृष्णांबुराशेर्नहिजगतिगतःकश्चिदेवावसानंकोवाप्यर्थैःप्रभूतैः
स्ववपुषिगलितेयौवनेसानुरागः॥गच्छामःसद्मयावद्विकसितकुमुदेंदीव
रालोकिनीनामाक्रम्याक्रम्यरूपंझटितिनजरयालुंप्यतेप्रेयसीनां॥१७॥उ
परिघनंघनपटलंतिर्यग्गिरयोपिनर्तितमयूराः॥क्षितिरपिकंदलधवला ११
दृष्टिंपथिकःक्वपातयतु॥१८॥संसारेस्मिन्नसारेपरिणतितरलेद्वेगतीपंडि

तानांतत्वज्ञानामृतांभः प्लुतलुलितधियां यातु कालः कदाचित॥ नो चेन्मुग्धां
गनानां स्तनजघनघनाभोगसंसर्गिनीनां स्थूलोपस्थस्थली षु स्थगि
तकरतलस्पर्शलोलोद्यतानां॥१९॥ क्वचित्सुभ्रूभंगैः क्वचिदपि चलज्जाप
रिगतैः क्वचिद्वीतित्रस्तैः क्वचिदपि च लीलाविलसितैः। कुमारीणामेतैर्वदन
सुभगैर्नेत्रवलितैः स्फुरन्नीलाब्जानां प्रकरसमकीर्णा इव दिशः॥२०॥ वक्त्रं
चंद्रविडंबि पंकजपरीहासक्षमे लोचने वर्णस्वर्णमपाकरिष्णुरलिनीजि
ष्णुः कचानां चयः। वक्षोजाविभकुंभविभ्रमहरो गुर्वी नितंबस्थली चेतो
हारि च मार्दवं युवतिषु स्वाभाविकं मंडनं॥२१॥ नामृतं न विषं किंचिदेकां मुक्त्वा
नितंबिनीं॥ सैवामृतलता रक्ता विरक्ता विषवल्लरी॥२२॥ आवर्त्तः संशयानामवि
नयभवनं पत्तनं साहसानां दोषाणां सन्निधानं कपटशतगृहं क्षेत्रमप्रत्ययानां॥
स्वर्गद्वारस्य विघ्नं नरकपुरमुखं सर्वमायाकरंडं स्त्रीयंत्रं केन सृष्टं विषममृत
मयं प्राणिलोकस्य पाशः॥२३॥ नो सत्येन मृगांक एव वदनीभूतेन चेंदीवर
द्वंद्वं लोचनतां गतं न कनकैरप्यंगयष्टिः कृता॥ किंत्वेवं कविभिः प्रतारितम
नास्तत्वं विजानन्नपि त्वग्मांसास्थिमयं वपुर्मृगदृशां मत्वा जनः सेवते॥२४॥
यदेतत्पूर्णेंदुद्युतिहरमुदाराकृतिधरं मुखाब्जं तन्वंग्याः किल वसति यत्रा

धरमधु॥ इदं तत्किंपाकद्रुमफलमिवातीव विरसं व्यतीतेऽस्मिन्काले विषमिव ज
विघातस्सुखं॥२५॥ संसारेऽस्मिन्नसारे कुनृपतिभवनद्वारसेवाकलंकेव्या
संगध्वस्तधैर्यं कथममलधियो मानसंवा विदध्युः॥ यद्येताः प्रोद्यदिंदुद्युतिनि
चयभृतो न स्फुरंत्यो ऽभनेत्राः प्रेंषत्कांचीकलापाः स्तनभरविनमन्मध्यभागा
13 स्तरुण्यः॥२६॥ शास्त्रज्ञोपि प्रगुणितनयोप्यात्मबोधापि गाढं संसारेऽस्मिन्
भवति विरलो भाजनं सद्गतीनां॥ येनैतस्मिन्निरयनगरद्वारमुद्घाट
यंती वामाक्षीणां भवति कुटिला भ्रूलता कुंचिकेवा॥२७॥ उन्मीलत्त्रिवली
२६ तरंगवलया प्रोत्तुंगपीनस्तनद्वंद्वेनोद्यतचक्रवाकमिथुना वक्त्रांबुजोद्भासिनी॥
कांताकारधरा नदीयमभितः क्रूराशया नेष्यते। संसारार्णवमज्जनं यदि ततो दू
रेण संत्यज्यतां॥२८॥ संसारभवपर्यंकपदवी न दवीयसी॥ अंतरा दुस्तरा न स्यु
र्यदि रे मदिरेक्षणा॥२९॥ कामिनीकायकांतारे कुचपर्वतदुर्गमे॥ मा संचर म
नः पांथ तत्रास्तेस्म तस्करः स्मरः॥३०॥ इदं हि मधुरगीतं रूपमेतद्रसोयं स्फुरति
परिमलोयं स्पर्श एष स्तनानां॥ इति हतपरमार्थैरिंद्रियैर्भ्राम्यमाणः स्वहितकर
णधूर्तैः पंचभिर्वंचितोसि॥३१॥ तावन्महत्त्वं पांडित्यं कुलीनत्वं विवेकिता॥ याव
ज्ज्वलति नांगेषु हतः पंचेषु पावकः॥३२॥ त्वं नु स्वयं नु हरयो हरिणेक्षणानां १२

येनाक्रियंत सततं गृहकर्मदासाः। वाचामगोचरचरित्रपवित्रिताय तस्मै न
मो भगवते मकरध्वजाय॥३३॥ विस्तारितं मकरकेतनधीवरेण स्त्रीसंज्ञितं
बडिशमत्र भवांबुराशौ। येनाचिरात्तदधरामिषलोलमर्त्यमत्स्यान्विकृष्य
सपचत्यनुरागवह्नौ॥३४॥ उन्मत्तप्रेमसंरंभादारभंते यदंगनाः। तत्र प्रत्यूहमा
धातुं ब्रह्मापि खलु कातरः॥३५॥ नूनं हि ते कविवरा विपरीतबोधा ये नित्यमाहु
रबला इति कामिनीनां। याभिर्विलोलतरतारकदृष्टिपातैः शक्रादयोपि विजि
तास्त्वबलाः कथं ताः॥३६॥ जल्पंति सार्द्धमन्येन पश्यंत्यन्यं सविभ्रमाः। हृदये चिं
तयंत्यन्यं प्रियः को नाम योषितां॥३७॥ न गम्यो मंत्राणां न च भवति भैषज्यवि
षयो न चापि प्रध्वंसं व्रजति विविधैः शांतिकशतैः। भ्रमावेशादंगे किमपि विद
धद्भंगमसमं स्मरापस्मारोयं भ्रमयति दृशं घूर्णयति च॥३८॥ इदमनुचितम
क्रमश्च पुंसां यदिह जरस्वपि मान्मथा विकाराः। तदपि च न कृतं नितंबिनीनां स्त
नपतनावधि जीवितं रतं वा॥३९॥ व्यादीर्घेण बलेन वक्रगतिना तेजस्विना भोगि
नानीलाब्जद्युतिनाहिना वरमहं दष्टो न तच्चक्षुषा। दष्टे संति चिकित्सका दिशि
दिशि प्रायेण धर्मार्थिनो मुग्धाक्षीक्षणवीक्षितस्य न हि मे मंत्रो न वाप्यौषधं॥४०॥
अपसर सखे दूरादस्मात्कटाक्षविषानलात्प्रकृतिविषमाद्योषित्सर्पाद्

विलासफणान्वितः ॥ इतरफणिना दष्टः शक्यश्चिकित्सितुमौषधैश्चटुलवनिताभो ।
गयस्तं त्यजंति हि मंत्रिणः ॥४१॥ सुधांशुः श्रीधाम स्फुरदमलरश्मिः शशधरः प्रियावक्त्रांभो
जं मलयजरसश्चातिसुरभिः ॥ स्रजो हृद्यामोदास्तदिदमखिलं रागिणि जने करोत्यं
तः क्षोभं नतु विषयसंसर्गविमुखे ॥४२॥ शृंगारद्रुमनीरदे प्रसृमरक्रीडारसस्रो
14 तसि । प्रद्युम्नप्रियबांधवे चतुरतामुक्ताफलोदन्वति ॥ तन्वीनेत्रचकोरपार्वणविधौ
सौरभ्यलक्ष्मीनिधौ धन्यः कोपि न विक्रियां कलयति प्राप्ते नवे यौवने ॥४३॥ रामस्या
गारमेकं नरकशतमहादुःखसंप्राप्तिहेतुर्मोहस्योत्पत्तिबीजं जलधरपटलं ज्ञा
नताराधिपस्य ॥ कंदर्पस्यैकमित्रं प्रकटितविविधस्पष्टदोषप्रबंधं लोकेस्मिन्नह्य
नर्थव्रजकुसुमवनं यौवनादन्यदस्ति ॥४४॥ द्रष्टव्येषु किमुत्तमं मृगदृशः प्रेम
प्रसन्नं मुखं घ्रातव्येष्वपि किं तदास्यपवनः श्रव्येषु किं तद्वचः ॥ किं स्वाद्येषु तदोष्ठ
पल्लवरसः स्पर्शेषु किं तत्तनुर्ध्येयं नवयौवने सहृदयैः सर्वत्रैते विभ्रमाः ॥४५॥ जा
त्यंधाय च दुर्मुखाय च जराजीर्णाखिलांगाय च ग्रामीणाय च दुःकुलाय च गलत
कुष्टाभिभूताय च ॥ यच्छंतीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया पण्यस्त्रीषु
विवेककल्पलतिकाशस्त्रीषु रज्येत कः ॥४६॥ कश्चुंबति कुलपुरुषो वेश्याधरपल्ल
वं मनोज्ञमपि ॥ चारभटचोरचेटकनटविटनिष्ठीवनशरावं ॥४७॥ वेश्यासोम १३

दनज्वालाकलापेंधनसमेधिता॥ कामिभिर्यत्र हूयंते यौवनानि धनानि च॥४८॥ एको
रागिषु राजते प्रियतमादेहार्द्धहारी हरो नीरागेषु जिनो विमुक्तललनासंगो न
यस्मात्परः॥ दुर्वारस्मरबाणपन्नगविषव्यासंगमुग्धो जनः शेषः कामविडंबि
तो हि विषयान्भोक्तुं न मोक्तुं क्षमः॥४९॥ एकैव काचिन्महतामवस्था सूक्ष्माणि
वस्त्राण्यथवा च कंथा॥ करायलग्ना जिनवाचबाला गंगातरंगेष्वथवाक्षमाला॥५०॥
आवासः क्रियतां गंगे पापवारिणि वारिणि॥ स्तनमध्ये तरुण्या वा मनोहारिणि हा
रिणि॥५१॥ स्वपरप्रतारकोऽयं निंदति यो लीकपंडितो युवतीः॥ यस्मात्तपसोऽपि
फलं स्वर्गः स्वर्गे युवतयः सरसाः॥५२॥ मालती शिरसि जृंभणोन्मुखी चंदनं
वपुषि कुंकुमाविलं॥ वक्षसि प्रियतमा मदालसा स्वर्ग एष परिशिष्ट आगतः॥५३॥
कुंकुमपंककलंकितदेहा गौरपयोधरकंपितहारा॥ नूपुरहंसरणत्पदपद्मा
कं न वशीकुरुते भुवि रामा॥५४॥ उद्वृत्तस्तनभार एष तरले नेत्रे चलं भ्रूलते
रागाधिष्ठितमोष्ठपल्लवमिदं कुर्वंतु नाम व्यथां॥ सौभाग्याक्षरपंक्तिकेव लिखि
ता पुष्पायुधेन स्वयं मध्यस्थापि करोति तापमधिकं रोमावली केन सा॥५५॥ विश्र
म्य विश्रम्य वनद्रुमाणां छायासु काचिद्विचचार तन्वी॥ स्तनोत्तरीयेण करोद्धृते
न निवारयंती शशिनो मयूखान्॥५६॥ अदर्शने दर्शनमात्रकामा दृष्टे परिष्वंगर

सैकलोला॥ आलिंगितायां पुनरायताक्ष्यामाश्वास्य देवि यहृयोरनेहं॥ ५७॥ उ
परिनिपतितानां अस्तव्यस्तधम्मिल्लकानां मुकुलितनयनानां किंचिदुन्मीलितानां॥
उपरिसुरतखेदात् खिन्नगल्लस्थलीनामधरमधु वधूनां भाग्यवंतः पिबंति॥ ५८॥
किं गतेन यदि सा न जीवति प्राणिति प्रियतमा तथापि किं॥ इत्युदीक्ष्य नवमे
घमालिकां न प्रयाति पथिकस्य मंदिरं॥ ५९॥ आमीलितनयनानां यः सुरतर
तो न संविदं कुरुते॥ मिथुनैर्मिथोवधारितमविंतमिदमेव काम निर्वहणं॥ ६०॥
प्रणयमधुरा प्रेमोद्गारा रसादलसोक्तिता॥ पणितमधुरा मुग्धप्रायाः प्रकासि
तसंमदाः। प्रकृतिसुभगा विस्रंभार्हाः स्मरोदयदायिनो रहसि किमपि स्वैरालापा
हरंति मृगीदृशां॥ ६१॥ परिमलभृतो वाताः शाखा नवांकुरकोटयो मधुपवि
रुतोत्कंठाभाजः प्रिया पिकपक्षिणी विरलसुरतस्वेदोद्गारा वधूवदनेंदवः प्र
सरति घनाक्ष्यानां यो भेकुतो पिशुणोदयः॥ ६२॥ अच्छाच्छचंदनरसार्द्रकरा मृगा
क्ष्यो धारागृहाणि कुसुमानि च कौमुदी च॥ मंदो मरुत्सुमनसः शुचिहर्म्यपृष्टं
ग्रीष्मे मदं च मदनं च विवर्द्धयंति॥ ६३॥ स्मितं किंचिद्वक्त्रे सरलतरलो दृष्टिवि
भवः परिस्पंदो वाचामभिनवविलासोक्तिसरसः॥ रतीनामारंभः किशलयति
लीलापरिकरः स्पृशंत्यास्तारुण्यं किमिव न हि रम्यं मृगदृशः॥ ६४॥ स्मृतास्त्व

तितापाय दृष्टा चोन्माद वर्द्धनी॥ स्पृष्टा न्नवति मोहाय सा नाम दयिता कथं॥६५॥
भ्रूचातुर्याकुंचिताक्षाः कटाक्षाः स्निग्धा वाचो लज्जितां ताश्च हासाः। लीलामंद
प्रस्थितं च स्थितं च स्त्रीणामेतद्भूषणं चायुधं च॥६६॥ प्राक् मामेति मनोरमागत
गुणे जाताभिलाषं ततः। सव्रीडं तदनुश्लथी कृत तनु प्रत्यस्तधैर्यं पुनः। प्रेमार्द्र
स्पृहणीय निर्भर रतक्रीडाप्रगल्भं ततो निःसंगांग विकर्षणाधिक सुखं रम्यं कुल
स्त्रीरतं॥६७॥ तावदेवामृतमयी यावल्लोचनगोचरा॥ चक्षुः पथादपेता तु वि
षादप्यतिरिच्यते॥६८॥ स्तनमाज्ञाकरस्तस्याः सुभ्रुवो मकरध्वजः। यद्भ्रुव्यानत्र
संचारसूचितोपि प्रवर्त्तते॥६९॥ सति प्रदीपे सत्यग्नौ सत्सु नानामणीषु च॥ विना
मे मृगशावाक्ष्या तमोभूतमिदं जगत्॥७०॥ मुखेन चंद्रकांतेन महानीलैः शिरोरुहैः॥
पाणिभ्यां पद्मरागाभ्यां रेजे रत्नमयीव सा॥७१॥ गुरुणा स्तनभारेण मुखचंद्रेण भा
स्वता॥ शनैश्चराभ्यां पादाभ्यां रेजे ग्रहमयीव सा॥७२॥ असितात्मासु संनद्धः स
माविष्टितचापलः। भुजंगकुटिलस्तस्या भ्रूविक्षेपः खलायते॥७३॥ मुग्धे धानुष्क
ताकेयमपूर्वा त्वयि दृश्यते॥ यया विध्यसि चेतांसि गुणैरेव न सायकैः॥७४॥ विरहे
पि संगमः खलु परस्परं संगतं मनो येषां। हृदयमपि घट्टितं संगमोपि विरहं विशेषय
ति॥७५॥

तस्यास्तनौ यदि घनौ जघनं च हारि वक्त्रं च चारु तव चित्त किमाकुलत्वं ॥ पुण्यं कु
रुष्व यदि तेषु तवास्ति वांछा पुण्यं विना न हि भवंति समीहितार्थाः ॥७६॥ पांथस्त्री
विरहानलाहुतिकथामातन्वती मंजरीमाकंदेषु पिकांगनाभिरधुना सोत्कं
वमालोक्यते ॥ अप्येते नवपाटलापरिमलप्राग्भारपाटच्चरा वांति क्लांतिवितान
नतानवकृतः श्रीखंडशैलानिलाः ॥७७॥ इतो विद्युद्वल्लीविलसितमितः केवल
तरुः स्फुरद्गंधः प्रोद्यज्जलदनिनदस्फूर्जितमितः । इतः केकिक्रीडाकलकल
रवः पक्ष्मलदृशां कथं यास्यंत्येते विरहदिवसाः संभृतरसाः ॥७८॥ इमे तारुण्य
श्रीनवपरिमलाः प्रौढसुरतप्रतापप्रारंभाः स्मरविजयदानप्रतिभुवः । चि
रं चेतश्चौरा अभिनवविकारैकगुरवो विलासव्यापाराः किमिव विजयंते मृ
गदृशां ॥७९॥ आवासः किल किं चितस्फटयिता पार्श्वे विलासालसा कर्णे को
किलकामिनीकलरवः स्मेरो लतामंडपः । गोष्ठी सत्कविभिः समं कतिपयैर्मु
ग्धाः सितांशोः कराः [redacted] केषांचित्सुखयंति चात्र हृदयं चैत्रे विचित्राः स्रजः ॥८०॥
असूचीसंचारे तमसि नभसि प्रौढजलदध्वनिप्राज्ञंमन्ये पतति पृषतानां च
निचये ॥ इदं सौदामिन्याः कनककमनीयं विलसितं मुदं च म्लानिं [redacted] निं च प्र १५

घयति पथि स्वैरसुदृशां ॥८१॥ केशाः संयमिनः श्रुतेरपि परं पारं गते लोचने
अंतर्वक्त्रमपि स्वभावशुचिभिः कीर्णं द्विजानां गणैः । मुक्तानां सततादिवास
रुचिरं वक्षोजकुंभद्वयं चेत्थं तन्वि वपुः प्रशांतमपि ते रागं करोत्येव नः ॥८२॥
प्रथितः प्रणयवतीनां तावत्पदमातनोतु हृदि मानः । भवति न यावच्चंदन
तरुसुरभिर्मलयपवमानः ॥८३॥ सहकारकुसुमकेसरनिकरभवामोद
मूर्छितदिगंते ॥ मधुरमधुविधुरमधुपे मधौ भवेत्कस्य नोत्कंठा ॥८४॥ स्रजो
हृद्यामोदा व्यजनपवनश्चंद्रकिरणाः परागः कासारो मलयजरजः सीधु वि
शदं ॥ शुचिः सौधोत्संगः प्रतनु वचनं पंकजदृशो निदाघार्त्तावेतद्विलसति
लभंते सुकृतिनः ॥८५॥ वियदुपचितमेघं भूमयः कंदलिन्यो नवकुटज
कदंबामोदिनो गंधवाहाः ॥ शिखिकुलकलकेकारावरम्या वनांताः सुखिन
मसुखिनं वा सर्वमुत्कंठयंति ॥८६॥ तरुणीचैषादीपितकामा विकसितजाती
पुष्पसुगंधिः । उन्नतपीनपयोधरभारा प्रावृषि तनुते कस्य न हर्षं ॥८७॥ आ
सारेण न हर्म्यतः प्रियतमैर्यातुं बहिः शक्यते शीतोत्कंपनिमित्तमायतदृ
शा गाढं समालिंग्यते ॥ जालैः सीकरशीतलाश्च मरुतश्चात्यंतखेदापहाः ॥

धन्यानां बत दुर्दिनं सुदिनतां याति प्रियासंगमे ॥८८॥ अर्द्धं नीत्वा निशायाः
सरभससुरतायासखंश्लेषयोगैः प्रोद्भूतासह्यतृष्णो मधुमदनिरतो हर्म्यपृ
ष्टे विविक्ते॥ संभोगक्लांतकांताशिथिलभुजलतावर्जितं कर्करीतो ज्योत्स्ना
भिन्नाच्छधारं न पिबति सलिलं शारदं मंदभाग्यः॥८९॥ प्रोद्यत्प्रौढप्रियंगुद्यु
17 तिभृति विदलत्कुंदमाद्यद्विरेफे काले प्रालेयवातप्रबलविकसितोद्दाम
मंदारदाम्नि॥ येषां नोत्कंठलग्ना क्षणमपि तुहिनक्षोददक्षा मृगाक्षी तेषा
मायामियामा यमसदनसमा यामिनी याति यूनां॥९०॥ हेमंते दधिदुग्ध
सर्पिरशना मांजिष्ठवासोभृतः काश्मीरद्रवसांद्रदिग्धवपुषः खिन्ना विचि
त्रै रतैः। वृत्तोरुस्तनकामिनीजनकृताश्लेषा गृहाभ्यंतरे तांबूलीदलपूगपूरि
तसुधा धन्याः सुखं शेरते॥९१॥ केशानाकलयन्दृशो मुकुलयन्वासो ब
लादाक्षिपन्नातन्वन्पुलकोद्गमं प्रकटयन्नावेगकंपं गतो॥ वारंवार
मुदारसीत्कृतकृतो दंतच्छदान्पीडयन्प्रायः शैशिर एष संप्रति मरुत्कांता
सु कांतायते॥९२॥ चुंबंतो गंडभित्तीरलकवति मुखे सीत्कृतान्यादधाना १६
वक्षःसूत्कंचुकेषु स्तनभरपुलकोद्भेदमापादयंतः। ऊरूनाकंपयंतः

पृथुजघनतटान्तसंश्रयंतोंशुकानि ॥ वाक्यं कांताजनानां विटचरितभृतः शो
शिरावंतिवाताः ॥९३॥ वैराग्ये संचरत्येको नीतौ भ्रमति चापरः । शृंगारे रमते
कश्चिद्भुवि भेदः परस्परं ॥९४॥ यदि वनहरिलीलावंशकांडस्थलीनां कवल
मुपलभ्येयं छिन्नमूलं कृशानां ॥ शुकयुवतिकपोलापांडुतांबूलवल्लीदल
मरुणनखाग्रैः पाटितं वा वधून्यः ॥९५॥ यथान्तरः पथ्यमरोचमानं जिजीवि
षुर्लोजनमाददीत ॥ तथा प्रियासु जुंविलोकयान्त्रां नुंजीतचोगान विषक्तचे
ताः ॥९६॥ स्त्रीमुद्रां झषकेतनस्य नृपतेः सर्वार्थसंपत्करीं ये मूढाः प्रविहाय
यांति कुधियो मिथ्याफलान्वेषिणः ॥ ते तेनैव निहत्य निर्दयतरं नग्नीकृता
मुंडिताः केचित्पंचशिखीकृताश्च जटिलाः कापालिकाश्चापरे ॥९७॥ सन्मा
र्गे तावदास्ते प्रभवति हि नरस्तावदेवेंद्रियाणां लज्जां तावद्विधत्ते विनयमपि
समालंबते तावदेव ॥ भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतंति ॥९८॥ यद्यस्य नास्ति
रुचिरं न तत्र तस्य स्पृहा मनोज्ञेपि ॥ रमणीयेपि सुधांशो न नामकामः सरोजि
न्याः ॥९९॥ वक्त्रं पूर्णशशी सुधाधरलता दंता मणिश्रेणयः कांतिश्रीर्गमनं गजः
परिमलस्ते पारिजातद्रुमाः ॥ वाणी कामदुघा कटाक्षपटली तत्कालकूटं विषं ॥

रेरे चाक्रदे किमर्थममरैरामंथि दुग्धोदधिः॥ ॥१००॥ ॥इति श्रीभर्तृ
हरिविरचिते शतत्रिके प्रबंधे द्वितीयं शृंगारशतकं संपूर्णं॥ २ ॥ अथेदानीं तृ
तीयकं वैराग्यशतकमारभ्यते॥ ॥श्रीः॥ ॥दिक्कालाद्यनवच्छिन्नानंत
चिन्मात्रमूर्त्तये॥ स्वानुभूत्येकमानाय नमः शांताय तेजसे॥१॥ बोद्धारो म
18 त्सरग्रस्ताः प्रभवः स्मयदूषिताः॥ अबोधोपहताश्चान्ये जीर्णमंगे सुभाषितं॥२॥
न संसारोत्पन्नं चरितमनुपश्यामि कुशलं विपाकः पुण्यानां जनयति भयं
मे विमृशतः॥ महद्भिः पुण्यौघैश्चिरपरिगृहीताश्च विषया महांतो जायंते
व्यसनमिव दातुं विषयिणां॥३॥ भ्रांत्वा देशमनेकदुर्गविषमं प्राप्तं न किंचित्
फलं त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निःफला॥ भुक्तं मानविव
र्जितं परगृहेष्वाशंकितं काकवत्तृष्णे जृंभसि पापकर्मनिरते नाद्यापि सं
तुष्यसि॥४॥ उत्खातं निधिशंकया क्षितितलं ध्माता गिरेर्धातवो निस्तीर्णः
सरितांपतिर्नृपतयो यत्नेन संतोषिताः॥ मंत्राराधनतत्परेण मनसा नीताः
श्मशाने निशाः प्राप्तः काणवराटकोपि न मया तृष्णेऽधुना मुंच मां॥५॥ खलो
ल्लापाः सोढाः कथमपि तदाराधनपरैर्निगृह्यांतर्बाष्पं हसितमपि शून्येन म १७
नसा॥ कृतश्चित्तस्तंभः प्रतिहतधियामंजलिरपि। त्वमाशे मोघाशे किम

परमतोनर्त्थयसिमां॥६॥ स्वादिष्टं मधुनो घृताच्च रसवद्यत्स्रवत्यक्षरं दैवीवा
गमृतात्मनोरसलवस्तेनैवत्रप्रावयं॥ कुत्सौ यावदमी भवंति धृतयस्तिद्वा
हूताः सकृवस्ताव द्वास्य रुताजं नैर्न हिधनेत्तोगानुसमीहामहे॥७॥
आदित्यस्यगतागतैरहरहः संक्षीयते जीवितं व्यापारैर्बहुकार्यभारगु
रुभिः कालो न विज्ञायते॥ दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत्॥८॥ दीनादीनमुखैः सदै
वशिशुकैराकृष्टजीर्णाम्बराक्रोशद्भिः क्षुधितैर्नरैर्न विधुरा दृश्येत चेद्गे
हिनी॥ याच्ञाभंगभयेन गद्गदगलत्रुट्यद्विलीनाक्षरं को देहीति वदे
त्स्वदग्धजठरस्यार्थे मनस्वी पुमान्॥९॥ निवृत्ता भोगेच्छा पुरुषबहुमानो
विगलितः समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः॥ शनैर्यष्ट्युत्थानं
घनतिमिररुद्धे च नयने अहो धृष्टः कायस्तदपि मरणापाय चकितः॥१०॥
हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं व्यालानां पशवस्तृणा
कुरभुजः स्पृष्टाः स्थलीशायिनः॥ संसारार्णवलंघनक्षमधियां वृत्तिः
कृत्ता सा नृणां यामन्वेषयतां प्रयाति सततं सर्वे समाप्तिं गुणाः॥११॥ नध्या
तं पदमीश्वरस्य विधिवत्संसारविच्छित्तये स्वर्गद्वारकपाटपाटनपटुर्ध

र्मोऽपि नोपार्जितः। नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिंगितं मातुः के
वलमेव यौवनवनछेदे कुठारा वयं॥१२॥ भोगा न भुक्ता वयमेव भुक्तास्तपो
न तप्तं वयमेव तप्ताः॥ कालो न यातो वयमेव याता तृष्णा न जीर्णा वयमेव
जीर्णाः॥१३॥ क्षांतं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः सोढा दुस्सह
शीतवाततपनक्लेशा न तप्तं तपः॥ ध्यानं वित्तमहर्निशं नियमितप्राणैर्न शंभोः
१९ पदं तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वंचिता॥१४॥ वलिभिर्मुखमा
क्रांतं पलितैरंकितं शिरः। गात्राणि शिथिलायंते तृष्णैका तरुणायते॥१५॥ ये
नैवांबरखंडेन संवीतो निशि चंद्रमाः। तेनैव च दिवा भानुरहो दौर्गत्यमेतयोः॥१६॥
अवश्यं यातारश्चिरतरमुषित्वापि विषया वियोगे को भेदस्त्यजति न जनो य
स्वयममून् व्रजंतः स्वातंत्र्याद्दतुलपरितापाय मनसः स्वयं त्यक्ता ह्येते शम
सुखमनंतं विदधति॥१७॥ विवेकव्याकोशे विकसति शमे शाम्यति तृष्णा परि
ष्वंगे तुंगे प्रसरति तरां सा परिणतिः॥ जराजीर्णैश्वर्यग्रसनगहना क्षेपकृ
पणः कृपापात्रं यस्यां भवति मरुतामप्यधिपतिः॥१८॥ कृशो। कृशः काणः ख
जः श्रवणरहितः पुच्छविकलो व्रणी पूयक्लिन्नः कृमिकुलशतैरावृतत १९
नुः। क्षुधाक्षामो जीर्णः पिठरककपालार्पितगलः शुनीमन्वेति श्वा हतम

पिचहं त्वेवमदनः॥१९॥ निद्राशानंतदपिनीरसमेकवारं शय्याच भूः प
रिजनो निजदेहमात्रं॥ वस्त्रं च जीर्णशतखंडमयी च कंथा हाहा तथापि
विषयान परित्यजंति॥२०॥ स्तनौमांसग्रंथी कनककलशावित्युपमितौ
मुखं श्लेष्मागारं तदपि च शशांकेन तुलितं॥ स्रवन्मूत्रक्लिन्नं करिवरक
रस्पर्द्धि जघनंमुहुर्निंद्यंरूपं कविजनविशेषैर्गुरुकृतं॥२१॥ अजान
न्माहात्म्यंपततिशलभस्तीव्रदहने समीनोप्यज्ञानाद्बडिशयुतमश्नाति
पिशितं॥ विजानंतोप्येतेवयमिह वियज्जालजटिलान्नमुंचामःकामानह
हगहनोमोहमहिमा॥२२॥ फलमलमशनायस्वादुपानायतोयंशयनम
वनिपृष्ठे वाससीवल्कलेच॥ नच धनमधुपानभ्रांतसर्वेंद्रियाणामविनय
मनुमंतुंनोत्सहे दुर्जनानां॥२३॥ विपुलहृदयैरन्यैः कैश्चिज्जगज्जनितं
पुरा॥ विधृतमपरैर्दत्तंचान्यैर्विजित्यतृणंयथा॥ इह हि भुवनान्यन्ये धी
राश्चतुर्दश भुंजते कतिपयपुरःस्वाम्ये पुंसां क एष मदज्वरः॥२४॥
त्वंराजावयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः ख्यातस्त्वंविभवैर्यशांसि
कवयोदिक्षुप्रतन्वंतिनः॥ इत्थंमानदनातिदूरमुभयोरप्यावयोरंतरं यद्यस्मा
सुपराङ्मुखोसिवयमप्येकांततो निःस्पृहाः॥२५॥ अनुक्तायां यस्यां क्षण

मपि न यातं नृपशतै र्भुवि वस्तस्याले नेक इव बभ्रमानः क्षितिभुजां॥ तदंश
स्याप्यंशेन तद्वय वलेशो पिपतंयो विषादे कर्त्तव्ये विदधति जडाः प्रस्तुतमदे॥२६॥
स जातः को प्यासीन्मदनरिपुणा मूर्द्ध्नि धवला कपालं यस्योच्चैर्विनिहित
मलंकारविधये॥ नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिदधुना महद्भिः कः पुं
सामयमतुलदर्पज्वरभरः॥२७॥ मृत्पिंडो जलरेखया वलयितः सर्वो प्ययं न
२० त्वणुस्तंस्वीकृत्य स एव संयुगशतै राज्ञां गणै र्भुज्यते॥ नेदद्युर्ददतेथवा कि
मपि न क्षुद्रा दरिद्रा भृशं धिक् धिक् तान्पुरुषाधमान्धनलवं तेन्यापि वां
छंतिये॥२८॥ न नटा न विटा न गायना परद्रोहनिबद्धबुद्धयः॥ नृपसद्मनि
नामके वयं स्तनभारोन्नमिता न योषितः॥२९॥ ददतु ददतु गालीर्गालि०॥२९॥
पुरा विद्वत्तासीदुपशमवतां क्लेशहतये गता कालेनासौ विषयसुखसि
द्ध्यै विषयिणां॥ इदानीं तु प्रेक्ष्य क्षितितलभुजः शास्त्रविमुखानहो कष्टं
सा च प्रतिदिनमधोधः प्रविशति॥३०॥ अर्थी नामी त्रिशिषेत्वं वयमपि च गि
रामीश्महे यावदर्थं॥ शूरस्त्वं वादिदर्पज्वरशमनविधावक्षयं पाटवं नः॥
सेवंते त्वां धनांधा मतिमलहतये मामिह श्रोतुकामा। मय्यप्यास्था न ते चेत्
त्वयि मम सुतरामेष राजन्गतो स्मि॥३१॥ यदा किंचिज्ज्ञोहं गज इव मदां १९

धः समभवं तदा सर्वज्ञोस्मीत्यभवदवलिप्तं मम मनः। यदा किंचित्किंचिद्
बुधजनसकाशादवगतं तदा मूर्खोस्मीति ज्वरइव मदो मे व्यपगतः॥२२॥ अ
तिक्रांतः कालो लटभललनाभोगसुभगो भ्रमंतः श्रांताः स्मः सुचिरमिह सं
सारसरणौ॥ इदानीं स्वःसिंधोस्तटभुवि समाक्रंदनगिरः सुतारैः फूत्कारैः शि
व शिव शिवेति प्रलपत॥२३॥ माने म्लायिनि खंडिते च वसुनि व्यर्थं प्रयातेऽ
र्थिनि क्षीणे बंधुजने गते परिजने नष्टे शनैर्यौवने॥ युक्तं केवलमेतदेव सुधि
यां यज्जह्नुकन्यापयःपूतग्रावगिरींद्रकंदरदरीकुंजे निवासः क्वचित्॥२४॥
परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा प्रसादं किं नेतुं विशसि हृदय
क्लेशकलितं॥ प्रसन्ने त्वय्यंतः स्वयमुदितचिंतामणिगुणे विमुक्तः संकल्पः
किमभिलषितं पुष्यति न मे॥२५॥ अनावस्त्रीकालो व्रजति स तथा तत्र गणि
तं दृष्टास्तास्ताः सोढा व्यसनशतसंपातविधुराः। कियद्वा वक्ष्यामः किमिव ब
त नात्मन्युपकृतं वयं यावज्जातस्तु नरपतिदेवव्यवसितं॥२६॥ न जिह्वाङः प्रापा
पथि पथि मठारामसरितः फलैः संपूर्णा भूर्विटपिमृगचर्मा विवसनी॥ सुखे
वाड्ः खेवासद्दुरापरिपाकः खलु तदा त्रिनेत्रं कस्य श्लाघनलवमदांधं प्रणमति॥२७॥

स्थितिः पुण्येरण्ये सह परिचयो हंत हरिणैः फलैर्मेध्यावृत्तिः प्रतिनदि च
तल्पानि दृषदः। इतीयं सामग्री भवति हरिभक्तिं स्पृहयतां वनं वा गेहे
वा सदृशामुपशांतैकमनसां॥३८॥ अमीषां प्राणानां तुलितबिसिनीपत्र
पयसां कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितं॥ यदाढ्यानामग्रे
२ द्रविणमदनिःसंज्ञमनसां कृतं वीतव्रीडैर्निजगुणकथापातकमपि॥३९॥
भ्रातः कष्टमहो महान् स नृपतिः सामंतचक्रं च तत्पार्श्वे तस्य च सापि राज
परिषत्ताश्चंद्रबिंबाननाः। उद्रिक्तः स च राजपुत्रनिवहस्ते बंदिनस्ताः कथाः
सर्वं यस्य वशादगात्स्मृतिपदं कालाय तस्मै नमः॥४०॥ वयं येभ्यो जाताश्चि
रपरिगता एव खलु ते समं यैः संवृद्धाः स्मृतिविषयतां तेपि गलिताः। इदानी
मेते स्मः प्रतिदिवसमासन्नपतना गतास्तुल्यावस्थां सिकतिलनदीतीरत
रुभिः॥४१॥ यत्रानेकः क्वचिदपि गृहे तत्र तिष्ठत्यथैको यत्राप्येकस्तदनु
बहवस्तत्र चांते न चैकः। इत्थं चेमौ रजनिदिवसौ दोलयन्द्वाविवाक्षौ का
लः काल्या सह बहुकलः क्रीडति प्राणिसारैः॥४२॥ तपस्यंतः संतः किम २०
पि निवसामः सुरनदीं गुणोदारान्दारानुत परिचरामः सविनयं॥ पिबा

मः शास्त्रौघानुत विविधकाव्यामृतरसान्न विद्मः किंकुर्मः कतिपय निमेषा
युषिजने ॥४३॥ गंगातीरे हिमगिरिशिलाबद्धपद्मासनस्य ब्रह्मध्यानाभ्यस
न विधिना योगनिद्रांगतस्य ॥ किंतैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशंकाः
संप्राप्स्यंते जरठहरिणाः शृंगकंडूविनोदं ॥४४॥ आसंसारं त्रिभुवनमिदं
चिन्वतां तात तादृङ् नैवास्माकं नयनपदवीं श्रोत्रवर्त्मागतो वा ॥ योयं धत्ते वि
षयकरिणी गाढरूढाभिमानः क्षीवस्यांतः करणकरिणः संयमालानलीलां ॥४५॥
वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या सम इह परितोषो निर्विशेषो विशे
षः ॥ स तु भवतु दरिद्रो यस्य तृष्णा विशाला मनसि तु परितुष्टे कोर्थवान्को
दरिद्रः ॥४६॥ यदेतत्स्वाछंद्यं विहरणमकार्पण्यमशनं सहार्यैः संवासः श्रुत
मुपशमैकव्रतफलं ॥ मनोमंदस्पंदं बहिरपि चिरस्यापि विमृशन्न जाने कस्यै
षा परिणतिरुदारस्य तपसः ॥४७॥ पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्ष
मक्षय्यमन्नं विस्तीर्णं वस्त्रमाशादशकमपमलं तल्पमस्वल्पमुर्वी ॥ येषां निः
संगतांगीकरणपरिणतिः स्वात्मसंतोषिणस्ते धन्याः संन्यस्तदैन्यव्यतिकर
निकराः कर्म निर्मूलयंति ॥४८॥ दुराराध्यः स्वामी तुरगचलचित्ताः क्षिति

नुजो वयं तु स्थूले श्रामहतिं च पादबद्धमनसः। जरादेहं मृत्युर्हरति सक
लं जीवितमिदं सखे नान्यच्छ्रेयो जगति विदुषोन्यत्र तपसः॥४९॥ भोगा मेघ
वितानमध्यविलसत्सौदामिनी चंचला आयुर्वायुविघट्टिताभ्रपटलीलीनां
बुवद्भंगुरं॥ लोला यौवनलालना तनुभृतामित्याकलय्य द्रुतं योगे धैर्य
समाधिसिद्धिसुलभे बुद्धिं विधद्ध्वं बुधाः॥५०॥ चांडालः किमयं द्विजातिरथ
22 वा शूद्रोथ किं तापसः किं वा तत्त्वनिवेशपेशलमतिर्योगीश्वरः कोपि किं॥
इत्युत्पन्नविकल्पजल्पमुखरैः संभाष्यमाणा जनैर्न क्रुद्धाः पथि नैव तुष्टमन
सो यांति स्वयं योगिनः॥५१॥ एतस्माद्विरमेंद्रियार्थगहनादायासकादा
श्रयः श्रेयोमार्गमशेषदुःखशमनं व्यापारदुःखक्षणात् शांतं भावमुपै
हि संत्यज निजां कल्लोललोलां गतिं मा भूयो भज भंगुरां भवरतिं चेतः प्र
सीदाधुना॥५२॥ अयं योगी तं सरसकवयः पार्श्वतो दाक्षिणात्याः दृष्टे लीला
वलयरणितं चामरग्राहिणीनां॥ यद्यस्त्येवं कुरु भवरसास्वादने लंपट
त्वं नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ॥५३॥ विरमत बुधा योषि २१
त्संगात्सुखात्क्षणभंगुरात् कुरुत करुणामैत्रीप्रज्ञाबंधनसंगमं॥ न खलु

नरकेहाराक्रांतंघनस्तनमंडलाश्शरणमथवाश्रोणीबिंबंरणन्मणिमे
खलं॥५४॥प्राणाघातान्निवृत्तिःपरधनहरणेसंयमःसत्यवाक्यंकालेश
क्त्याप्रदानंयुवतिजनकथामूकभावःपरेषां॥तृष्णास्रोतोविभंगोगुरु
षुचविनयःसर्वभूतानुकंपासामान्याःसर्वशास्त्रेष्वनुपहतविधिःश्रेय
सामेषपंथाः॥५५॥मातर्लक्ष्मिभजस्वकंचिदपरंमत्कांक्षिणीमास्मभूर्भोगे
भ्यःस्पृहयालवस्तववशेकानिःस्पृहाणामसि॥सद्यःस्यूतपलाशपत्रपु
टिकापात्रेपवित्रीकृतेभिक्षासक्तुभिरेवसंप्रतिवयंवृत्तिंसमीहाम
हे॥५६॥यूयंवयंवयंयूयमित्यासीन्मतिरावयोः॥किंजातमधुनायेन
यूयंयूयंवयंवयं॥५७॥बालेलीलामुकुलितममीमंथरादृष्टिपाताःकिं
क्षिप्यंतेविरमविरमव्यर्थएषश्रमस्ते॥संप्रत्यन्येवयमुपरतंबाल्यमास्थाव
नांतेक्षीणोमोहस्तृणमिवजगज्जालमालोकयामः॥५८॥रम्यंहर्म्यतलं
नकिंवसतयेश्रव्यंनगेयादिकंकिंवाप्राणसमंसमागमसुखंनैवाधिकंप्री
तये॥किंतुभ्रांतपतत्पतंगपवनव्यालोलदीपांकुरछायाचंचलमाकलय्य
